# संस्कृतवार्ताः

**दिनाङ्कः : 01/10/2025** **सायम् - 06:20**

**आदौ-मुख्यवार्ता:**

- **केन्द्रीय-मन्त्रिमण्डलेन अद्य केन्द्रीयकर्मचारिभ्य: सेवानिवृत्त-वेतनभोगिभ्यश्च महार्घता-व्यये प्रतिशतं त्रि-मितायाः वृद्धेः निर्णयः स्वीकृत: ।**
- **प्रशासनेन देशे सप्तपञ्चाशत् नूतनकेन्द्रीयविद्यालयानां स्थापनायस्वीकृतिः प्रदत्ता। सममेव आगामि-वित्तवर्षात् शारदीयशस्यानां न्यूनतम-समर्थन-मूल्ये वृद्धिः अपि अनुमता।**
- **प्रधानमन्त्री नरेन्द्रमोदी अवोचत् यत् राष्ट्रिय-स्वयं-सेवक-सङ्घः राष्ट्र-निर्माणे समाजस्य सशक्तीकरणे च सततं कार्यरतो वर्तते।**
- **भारतीय-रिजर्व-वित्तकोषेन वर्तमान-वित्त-वर्षाय सकल-गृह्योत्पादस्य वृद्धेः अनुमानं संशोध्य प्रतिशतं षड्-दशमलव-अष्ट-मितं विहितम्। अथ च वर्तमान-वित्तवर्षाय मुद्रास्फीतेः अनुमानमपि प्रतिशतं द्वि- दशमलव-षड्-मितं विहितं, यद्धि प्राक्तन्-अनुमानात् न्यूनमस्ति।**
- **देशस्य नकेषु भागेषु अद्य महानवमी पर्व महतोल्लासेन आचर्यते।**

---

**मन्त्रिमंडलीय-निर्णय:**

केन्द्रीय: मन्त्रिमण्डलेन अद्य महार्घता व्यये वृद्धे निर्णयः स्वीकृत:, तत: केन्द्रीयकर्मचारिभ्य: सेवानिवृत्त-वेतनभोगिभ्यश्च प्रत्येकं प्रतिशतं त्रिमितः महार्घताराशि: प्रदास्यते। अद्य नवदेहल्यां मन्त्रिमण्डलीयोपवेशनानन्तरं वार्ताहरेभ्य: इयं सूचना प्रसारणमन्त्रिणा अश्विनीवैष्णवेन प्रदत्ता, तेन प्रोक्तं यत् अनेन निर्णयेन प्राय: एकोनपञ्चाशत-दशमलव-द्विलक्ष-केन्द्रीय-कर्मचारिण: अष्टषष्टि-लक्षाधिक-सेवानिवृत्त-कर्मचारिणश्च लाभान्विता: भविष्यन्ति। निर्णयोऽयं गतजुलायि-मासस्य प्रथमदिनाङ्कात् प्रभावी भविष्यति।

आर्थिक-प्रकरण-सम्बद्ध-केन्द्रीय-मन्त्रिमण्डल-समित्या आदेशं इदमपि निर्णीतं यत् अष्ट-पञ्चाशत्-द्वि-षष्टि-कोटिरुप्यक-परिव्ययेन सप्तपञ्चाशत्-सङ्ख्यका: नवीना: केन्द्रीय-विद्यालया: अपि उद्घाटयिष्यन्ते।

श्रीवैष्णवेन प्रोक्तं यत् एतादृशेषु जनपदेषु अपि विंशत्यधिक-विद्यालयाः उद्घाटयिष्यन्ते, यत्र अधुना पर्यन्तं कोपि केन्द्रीयविद्यालयो नास्ति। नवीन विद्यालय-उद्घाटनेन शिक्षकाणां षड्चत्वारिंशत्शतं अतिरिक्तपदानि सर्जितानि भविष्यन्ति सप्ताशीति-सहस्रं छात्रा: चापि लाभान्विता: भविष्यन्ति। सममेव केंद्रीय मन्त्रिमण्डलस्य आर्थिक समित्या आगामि-वित्तवर्षात् शारदीयशस्यानां न्यूनतम-समर्थन-मूल्ये वृद्धिः अपि अनुमता।

-----------------------------------------------

**प्रधानमन्त्री आर.एस.एस.**

प्रधानमन्त्री नरेन्द्र-मोदी अद्य नवदिल्ल्यां राष्ट्रिय-स्वयं-सेवक-संघस्य शताब्दी समारोहे भागम् अभजत्। शताब्दी समारोहः आर.एस.एस. इत्यस्य रिक्थं सङ्घस्य सांस्कृतिकं योगदानम् अथ च देशस्य एकतायां सङ्घस्य भूमिकां दर्शयति। अत्रावसरे निज-सम्बोधने प्रधानमन्त्रिणा उक्तं यत् आर.एस.एस. इति राष्ट्र-निर्माणाय कार्यरतो वर्तते। तेनोक्तं यत् शत-वर्ष-पूर्वम् अद्य एव सङ्घटनस्य रूपे राष्ट्रिय-स्वयं-सेवक-संघस्य स्थापना केवलं संयोगः नासीत् अपितु सहस्र-वर्षेभ्यः अनुवर्तमाना एकस्याः परम्परायाः पुनरुत्थानम् आसीत्।

अस्मिन् अवसरे श्रीमोदिना राष्ट्रनिर्माणे राष्ट्रिय-स्वयं-सेवक-संघस्य योगदानेन सम्बद्धे विशेष-स्मारक-प्रैष-चिटिका पणकं च प्रख्यापिते। प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तं यत् श्वः विजयादशमी पर्व अस्ति। इदं पर्व अन्याये न्यायस्य विजयस्य प्रतीकं वर्तते। अस्मिन् अवसरे केन्द्रीय-संस्कृति-मन्त्री गजेन्द्र-सिंह-शेखावतः अवोचत् यत् आर.एस.एस. इत्येतत् जनेषु राष्ट्र-निर्माणसस्य सांस्कृतिक-जागरूकतायाः च भावनां जागर्ति। आर.एस.एस. इत्यस्य सरकार्यवाहः दत्तात्रेयः होसबोले अवोचत् यत् संघस्य कार्याणि गतिविधियश्च देशस्य प्रत्येकं कोणे अवलोकयितुं शक्यन्ते। तेनोक्तं यत् समाजः सङ्घेन विधियमानैः विविध-कार्यैः परिचितो विद्यते। स्वयंसेवकाः समाजं एकस्मिन् सूत्रे स्थापयन् सामाजिकविकासे राष्ट्रसेवायां सुरक्षायां विविध-कल्याणकारी-गतिविधिषु च सक्रियरूपेण संलग्नाः सन्ति।

-----------------------------------------------

**आर.बी.आई. मौद्रिकनीतिः**

भारतीय-रिजर्व-वित्तकोषेण स्वीय-सकल-गृह्य-उत्पादन-वृद्धिमात्रायां संशोधनं कृतम्। प्रवर्तमान-वित्त-वर्षाय विकासानुमानं संशोध्य षड्-दशमलव-अष्ट-प्रतिशतमितं कृतम्। एतस्मात् प्रवर्तमान-वित्त-वर्षस्य कृते मुद्रा-स्फीते: अपि अनुमानं द्विदशमलव-षड्मितं कृतम्, यच्च पूर्वापेक्षया न्यूनमस्ति। अवधेयं यत् भारतीय-रिजर्व-वित्तकोषेन पञ्चविंशति-षड्विंशतिवर्षयो: गृह्योत्पादन-वृद्धेरनुमानं षडाधिक-पञ्च-प्रतिंशत-मितं कृतमासीत् अपि च मुद्रास्फीतेरनुमानं त्र्यधिक-एक-प्रतिशत-मितं कृतम् आसीत्। एतस्मिन् अन्तरे भारतीय-रिजर्व-वित्तकोषेन कुसीदमात्रा पूर्ववदेव स्थापिता अस्ति।

-----------------------------------------------

**राजनाथ-रक्षा**

रक्षा-मन्त्री राजनाथसिंहः अवोचत् सर्वकारेण वस्तु-सेवा कर-मूल्यानि युक्तिसंगतानि कृतानि। येन रक्षाक्षेत्रे क्रयणे साक्षात् प्रभावो भविष्यति। श्री सिंहः अद्य नवदिल्यां ऐषम: रक्षा लेखा विभाग दिवस समारोहं सम्बोधयति स्म।

अमुना उक्तं यत् रक्षा आय-व्ययस्य संरक्षरूपेण लेखा विभाग अनुसन्धानं विकासं च सुगमं विधातुं महत्वपूर्णां भूमिकां निभालयति।

-----------------------------------------------

**प्रधानमन्त्री फिलिपींस**

प्रधानमन्त्रिणा नरेन्द्रमोदिना फिलीपींस-देशे दुरापन्नेन भूकम्पेन जनधन-हानौ व्यापक-क्षतौ दुखं प्रकटितम्। एकस्मिन् सोशल मीडिया पोस्ट इति सामाजिक-सञ्चारपटले प्रधानमन्त्री मोदी शोक-सन्तप्तान् परिवारान् प्रति स्वीयाः संवेदनाः प्रकटितवान्। प्रधानमन्त्रिणा आहतानां शीघ्र-स्वस्थलाभस्य कामना कृता। तेनोक्तं यत् अस्यां कठिन-स्थित्यां भारतं फिलीपींस-देशेन सह ऐक्यभवनया तिष्ठति।

-----------------------------------------------

**नवम्याः शुभकामना**

नवरात्रपर्वणः नवमे दिने अद्य नवम्यां देव्याः दुर्गायाः सिद्धिदात्री स्वरूपस्य पूजा विधीयते। अत्रावसरे प्रधानमन्त्री नरेन्द्र-मोदी नागरिकेभ्यः दुर्गापूजायाः शुभकामनाः अयच्छत्। सामाजिकसञ्चारपटले प्रधानमन्त्री अलिखत् यत् नवरात्रपर्व समेषां जीवने सौहार्दं सुखं च आनयेत्।

-----------------------------------------------

**राष्ट्रपतिः विजयदशमी**

राष्ट्रपतिः द्रौपदीमुर्मुः विजया-दशमी-पर्वणः पूर्वसन्ध्यायां देशवासिभ्यः विजयादशमीपर्वणः शुभकामनाः प्रदत्तवती। राष्ट्रपतिना समुदीरितं यत् अयं हि पर्वः अधर्मे धर्मस्य विजयो भवति इति प्रतीकत्वेन स्वीक्रियते अथ च जनान् सत्यधर्म-मार्गं प्रति अग्रेसरं भवितुं प्रेरयति।

**॥ इति वार्ताः ॥**